CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library
S. J. P. B
Coll. No. 171

Title Tarkasangrahadipika

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 171

Subject: Nyāya

Title: Tarkasaṅgrahadīpikā

Author: Annambhaṭṭopādhyāya

Scribe: Śivabhadra

Date of the work: —

Date of the Ms.: —

Place of the work: —

Place of the Ms.: —

Size: 9·5" by 4·5"

Extent: 29 full.

Language: Sanskrit.

Script: Devanāgarī

Remarks: Complete. See No. 169

॥१॥ ॥श्रीगणेशायनमः॥ विश्वेश्वरंसांबमूर्त्तिंप्रणिपत्यागिरंगुरुं॥ टीकांशिशुहितांकुर्वेतर्क
संग्रहदीपिकाम्॥१॥ चिकीर्षितस्याविघ्नपरिसमाप्त्यर्थंशिष्टाचारानुमितश्रुतिबोधित
कर्त्तव्यताकमिष्टदेवतानमस्कारलक्षणंमंगलंशिष्यशिक्षार्थंनिबध्नन्चिकीर्षितं
प्रतिजानीते॥ निधायेति॥ ननुमंगलस्यसमाप्तिसाधनत्वंनास्ति॥ मंगलेकृतेपि
किरणावल्यादौसमाप्त्यदर्शनात्॥ मंगलाभावेपिकादंबर्यादौसमाप्तिदर्शनात्॥
अ- न्वयव्यतिरेकव्यभिचारादितिचेन्न॥ किरणावल्यादौविघ्नबाहुल्यात्समाप्त्य
भावः॥ कादंबर्यादौग्रंथाद्बहिरेवमंगलंकृतं॥ अतोनव्यभिचारः॥ ननुमंगलस्य शिव
कर्त्तव्यत्वेकिंप्रमाणमितिचेन्न॥ शिष्टाचारानुमितश्रुतेरेवप्रमाणत्वात्॥ तथा ॥१॥

हि॥ मंगलंवेदबोधितकर्त्तव्यताकं॥ अलौकिकाविगीतशिष्टाचारविषयत्वात्॥ द
र्शादिवत्॥ भोजनादौव्यभिचारवारणाय॥ लौकिकेति॥ रात्रिश्राद्धादौव्यभिचारवार
णायाविगीतेति॥ शिष्टपदंस्पष्टार्थं॥ नकुर्यान्निष्फलंकर्मेतिजलताडनादेरपिनि
षिद्धत्वादिति॥ तर्क्यंतेप्रतिपाद्यंतेइतितर्काः॥ द्रव्यादिसप्तपदार्थाः॥ तेषांसंग्रहः
संक्षेपेणस्वरूपकथनंक्रियतइत्यर्थः॥ कस्मैप्रयोजनायेत्यतआह॥ सुखबो
धायेति॥ सुखेनानायासेनबोधःपदार्थज्ञानंतस्मैइत्यर्थः॥ ननुबहुतर्कग्रंथेषु
किमर्थमपूर्वग्रंथःक्रियतइत्यतआह॥ बालानामिति॥ तेषामतिविस्तृतत्वात्॥
बालानांबोधोनभवतीत्यर्थः॥ ग्रहणधारणपटुर्बालोनतुस्तनंधयः॥ किंच

॥२॥ त्क्रियत इत्यत आह ॥ निधायेति ॥ विश्वेश्वरं जगन्नियंतारं सांबशिवं हृदि मनसि
निधाय स्थापयित्वा सर्वदा ध्यानपरो भूत्वेत्यर्थः ॥ गुरूणां विद्यागुरूणां वंदनं
नमस्कारं विधाय कृत्वेत्यर्थः ॥ पदार्थान्विभजते ॥ द्रव्येति ॥ पदस्यार्थः पदार्थ इति
व्युत्पत्त्याभिधेयत्वं पदार्थसामान्यलक्षणं लभ्यते ॥ ननु विभागादेव सप्तत्वे सिद्धे
सप्तग्रहणं व्यर्थमिति चेन्न ॥ अधिकसंख्याव्यवच्छेदार्थत्वात् ॥ नन्वतिरिक्तः
पदार्थः प्रमितो वा न ॥ नाद्यः ॥ प्रमितस्य निषेधायोगात् ॥ न द्वितीयः ॥ प्रतियो
गिप्रमितिं विना निषेधानुपपत्तिरिति चेन्न ॥ पदार्थत्वं द्रव्यादिसप्तान्यत शिव
मत्वव्याप्यमिति व्यवच्छेदार्थत्वात् ॥ ननु सप्तान्यतमत्वं सप्तभिन्नभिन्नत्वं ॥२॥

इति वक्तव्यं ॥ एवं च सप्तभिन्नस्याप्रसिद्धत्वात्सप्तान्यतमत्वं कथमिति चेन्न ॥
द्रव्यादिसप्तान्यतमत्वं द्रव्यादिभेदसप्तकाभाववत्त्वमित्युक्तत्वात् ॥ एवम
ग्रेपि द्रष्टव्यं ॥ द्रव्यं विभजते ॥ तत्रेति ॥ तत्र द्रव्यादिमध्य इत्यर्थः ॥ द्रव्या
णि नवैवेत्यन्वयः ॥ कानि तानीत्यत आह ॥ पृथीव्यादीनि ॥ ननु तमसो
दशमद्रव्यस्य विद्यमानत्वात् कथं नव द्रव्याणि ॥ नीलं तमश्चलती
न त्यबाधितप्रतीतिबलान्नीलरूपाधारतया ॥ क्रियाधारतया च द्रव्यत्वं
तावत्सिद्धं ॥ तत्र तमसो नाकाशादिपंचकेष्वंतर्भावः ॥ रूपवत्त्वात् ॥
अत एव न वायौ ॥ सदागतिमत्त्वाभावाच्च ॥ नापि तेजसि ॥ भास्वररू

॥३॥ पाभावादुष्णस्पर्शाभावाच्च॥नापिजले॥शीतस्पर्शाभावान्नीलरूपव
त्वाच्च॥नापिपृथिव्यां॥गंधाभावात्॥स्पर्शरहितत्वाच्च॥तस्मात्तमो
दशमंद्रव्यमितिचेन्न॥तमसस्तेजोभावरूपत्वात्॥तथाहि॥त
मोहिनरूपवद्द्रव्यं॥आलोकासहकृतचक्षुर्ग्राह्यत्वात्॥आलोका
यामा४ भाववत्॥रूपिचाक्षुषप्रमालोकस्यकारणत्वात्॥तस्मात्प्रौढप्र
काशकतेजःसामान्याभावस्तमः॥तत्रनीलंतमश्चलतीतिप्र
त्ययोभ्रमः॥अतोनवद्रव्याणीतिसिद्धं॥द्रव्यत्वजातिमत्त्वंगुण ।शिव
वत्त्वंवाद्रव्यसामान्यलक्षणं॥लक्ष्यैकदेशावृत्तित्वमव्याप्तिः॥य ॥३॥

प्रौढप्रकाशकत्वंनाम·प्रकृष्टमहत्त्वोद्भूतानभिभूतत्वं

थागोःकपिलत्वं॥अलक्ष्यवृत्तित्वमतिव्याप्तिः॥यथागोःशृंगित्वं॥लक्ष्यमात्राव
र्त्तनमसंभवः॥यथागोरेकशफवत्त्वं॥एतद्दूषणत्रयरहितोधर्मोलक्षणं॥सए
वासाधारणधर्मउच्यते॥लक्ष्यतावच्छेदकसमनियतत्वमसाधारणत्वं॥व्या
वर्त्तकस्यैवलक्षणत्वेव्यावृत्तावभिधेयत्वादौचातिव्याप्तिवारणायतद्भिन्नं त्वे
धर्मविशेषणंदेयं॥व्यवहारस्यापिलक्षणप्रयोजनत्वेनदेयं॥व्यावृ
त्तेरपिव्यवहारसाध्यकत्वात्॥ननुगुणवत्त्वंनद्रव्यलक्षणं॥आद्यक्षणेउ
त्पन्नविनष्टेचाव्याप्तिरितिचेन्न॥गुणसमानाधिकरणसत्ताभिन्नजातिम
त्त्वस्यविवक्षितत्वात्॥नन्वेवमप्येकंरूपंरसात्पृथगितिव्यवहारानुरूपा

॥४॥ दावतिव्याप्तिरितिचेन्न॥एकार्थसमवायादेवतादृग्व्यवहारोपपत्तौगुणेगुणा
नंगीकारात्॥गुणान्विभजते॥रूपेति॥द्रव्यकर्मभिन्नत्वेसतिसामान्यवान्गु
णः।गुणत्वजातिमान्वा॥ननुलघुत्वमृदुत्वकठिनत्वादीनांविद्यमानत्वात्क
थंचतुर्विंशतिर्गुणाइतिचेन्न॥लघुत्वस्यगुरुत्वाभावरूपत्वात्मृदुत्वक
ठिनत्वयोरवयवसंयोगविशेषरूपत्वात्॥कर्मविभजते॥उत्क्षेपणेति॥सं
योगभिन्नत्वेसतिसंयोगासमवायिकारणंकर्मकर्मत्वजातिमद्वा॥भ्रम
णादीनामपिगमनेंतर्भावान्नपंचत्वविरोधः॥सामान्यंविभजते॥पर
मिति॥परमधिकवृत्ति॥अपरंन्यूनवृत्ति॥सामान्यादिचतुष्टयेजाति शिव

॥४॥

र्नास्ति॥विशेषंविभजते॥नित्येति॥पृथिव्यादिचतुष्टयस्यपरमाणवः॥आका
शादिपंचकंच।नित्यद्रव्याणि।समवायस्यभेदोनास्तीत्याह॥समवायस्त्वेति।
अभावंविभजते॥प्रागभावइति॥तत्रउद्देशक्रमानुसारात्प्रथमंपृथि
व्यालक्षणमाह॥गंधवतीति॥नाम्नापदार्थसंकीर्तनंउद्देशः।उद्देशक्र
मेचसर्वत्रेच्छैवनियामिका॥ननुसुरभ्यसुरभ्यवयवारब्धेद्रव्येपरस्पर
विरोधेनगंधानुत्पादादव्याप्तिः॥नचतत्रगंधप्रतीत्यनुपपत्तिरिति
वाच्यं।अवयवगंधस्यैवतत्रप्रतीतिसंभवेनचित्रगंधानंगीकारात्।
किंचोत्पन्नविनष्टघटादावव्याप्तिरितिचेन्न।गंधसमानाधिकरणद्र

त्वापरजातिमत्वस्य विवक्षितत्वात्॥ ननु जलादावपि गंधप्रतीतेरतिव्याप्ति
रिति चेन्न॥ अन्वयव्यतिरेकाभ्यां पृथिवीगंधस्यैव तत्र भानांगीकारात्॥ ननु
तथापि कालस्य सर्वाधारतया सर्वेषां लक्षणानां कालेऽतिव्याप्तिरिति चेन्न॥
सर्वाधारताप्रयोजकसंबंधभिन्नसंबंधेन लक्षणस्य स्वस्याभिमतत्वात्॥ पृथ्वीं वि
भजते॥ सा द्विधेति॥ नित्यत्वं ध्वंसाप्रतियोगित्वं॥ ध्वंसप्रतियोगित्वमनित्यत्वं॥
प्रकारांतरेण विभजते॥ पुनरिति॥ आत्मनो भोगायतनं शरीरं॥ यदवच्छिन्ना
त्मनि भोगो जायते तद्भोगायतनं॥ सुखदुःखान्यतरसाक्षात्कारो भोगः॥ शब्देत
रोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानकारणमनःसंयोगाश्रयत्वं इंद्रियत्वं॥ शिव
शरीरेंद्रियभिन्नो विषयः॥ एवं च गंधवच्छरीरं पार्थिवं शरीरं॥ गंधवदिंद्रियं पा

संयोगाश्रयत्वमित्युक्ते घटादिके विसंयोगाश्रयत्वमात्माय यस्मिन्कस्मिंश्चित्संयोगाश्रयेऽतिव्याप्तिवारणाय मन इति॰ शरीरसं ॥५॥
योगाश्रये मनः शरीरेऽतिव्याप्तिवारणाय ज्ञानकारणेति॰ आत्मनि अतिव्याप्तिवारणाय विशेषेति॰ चक्षुरिंद्रिये अव्या
प्तिवारणाय उद्भूतेति॰ श्रोत्रेंद्रिये अव्याप्तिवारणाय शब्देतरेति॰२

र्थिवेंद्रियं॥ गंधवान् विषयः पार्थिवविषय इति॥ एवं लक्षणं बोध्यं॥ पार्थिवं शरीरं ल
क्षयति॥ शरीरमिति॥ इंद्रियं दर्शयति॥ इंद्रियमिति॥ गंधग्राहकमिति॥ प्रयोजनकथ
नं॥ घ्राणमिति संज्ञा॥ नासाग्रवर्त्तीत्याश्रयोक्तिः॥ एवं उत्तरत्र ज्ञेयं॥ पार्थिवविषयं दर्श
यति॥ मृत्पाषाणेति॥ अपां लक्षणमाह॥ शीतेति॥ उत्पन्नविनष्टजलेऽव्याप्तिवारणा
य शीतस्पर्शसमानाधिकरणद्रव्यत्वापरजातिमत्त्वं तात्पर्यं॥ शीतं शिलातलमि
त्यादौ जलसंबंधादेव शीतस्पर्शभानमिति नातिव्याप्तिः॥ अन्यत्सर्वं पृथिवीवत् व्या
ख्येयं॥ तेजो लक्षणमाह॥ उष्णस्पर्शवदिति॥ उष्णं जलमिति प्रतीतेस्तेजःसंबंधा
नुविधायित्वान्नातिव्याप्तिः॥ विषयं विभजते॥ भौमेति॥ ननु सुवर्णं पार्थिवं पीत

त्वाद्गुरुत्वात् हरिद्रादिवत् इति चेन्न ॥ अत्यंतानलसंयोगे सति घृतादौ द्रवत्वना
शदर्शनेन जलमध्यस्थघृते नाशादर्शनेन असत्तिप्रतिबंधके पार्थिवद्रव
त्वनाशाग्निसंयोगयोः कार्यकारणभावावधारणात् ॥ सुवर्णस्य अत्यंतानल
संयोगे सत्यनुच्छिद्यमानद्रवत्वाधिकरणत्वेन पार्थिवत्वानुपपत्तेः ॥ तस्मात्पी
तद्रव्यद्रवत्वनाशप्रतिबंधकतया द्रवद्रव्यांतरसिद्धौ नैमित्तिकद्रवत्वाधिकर
णतया तैजसत्वानुपपत्तेः ॥ रूपवत्तया वाय्वादिषु अनंतर्भावात्तैजसत्वसिद्धिः ॥
नसउष्णस्पर्शभास्वररूपयोरुपष्टंभकपार्थिवरूपस्पर्शाभ्यां प्रतिबंधादनु
पलब्धिः ॥ तस्मात्सुवर्णं तैजसमिति ॥ वायुं लक्षयति ॥ रूपरहितइति ॥ आ
काशादावतिव्याप्तिवारणाय स्पर्शवानिति ॥ पृथिव्यादावतिव्याप्तिवारणाय

रूपरहितइति ॥ ननु प्राणस्य कुत्रांतर्भाव इत्यत आह ॥ शरीरेति ॥ संचेति ॥ एक
एव प्राणः स्थानभेदात् प्राणापानादिशब्दैर्व्यपदिश्यत इत्यर्थः ॥ स्पर्शानुमेयो
वायुः ॥ तथाहि ॥ योयं वायौ वाति सति अनुष्णाशीतस्पर्शो भासते स स्पर्शः ॥
क्वचिदाश्रितः गुणत्वात् रूपवत् ॥ न चास्य पृथिव्याश्रयः उद्भूतस्पर्शवत्पा
सामानाधिकरण्य इतिशेषः र्थिवस्य उद्भूतरूपवत्त्वनियमात् ॥ न जलतेजसोः ॥ अनुष्णाशीतस्पर्शव
त्वात् ॥ न विभुचतुष्टयस्य सर्वत्रोपलब्धिप्रसंगात् ॥ न मनसः ॥ परमाणु
स्पर्शस्यातींद्रियत्वात् ॥ तस्माद्यः प्रतीयमानस्पर्शाश्रयः स वायुः ॥ ननु
वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वात् ॥ घटवदिति चेन्न ॥ उद्भूतरूपवत्त्व
स्योपाधित्वात् ॥ यत्र द्रव्यत्वे सति बहिरिंद्रियप्रत्यक्षत्वं तत्रोद्भूतरूप

तर्कदीपिका

॥ ७ ॥ वर्तमितिसाध्यव्यापकत्वं॥पक्षे साधनाव्यापकत्वं॥नचैवंतप्तवारिस्थतेजसो
प्यप्रत्यक्षत्वापत्तिः॥इष्टत्वात्॥तस्माद्रूपरहितत्वाद्वायुरप्रत्यक्षः॥इदानींका
र्यरूपपृथिव्यादिचतुष्टयस्योत्पत्तिविनाशप्रकारःकथ्यते॥ईश्वरस्यचिकीर्षावि
शात्॥परमाणुषुक्रियाजायते॥ततःपरमाणुद्वयसंयोगेसतिद्व्यणुकमुत्प
द्यते॥त्रिभिर्द्व्यणुकैस्त्र्यणुकं॥एवंचतुरणुकादिक्रमेणमहापृथ्वी॥महत्यआपः
महत्तेजः महान्वायुरुत्पद्यते॥एवमुत्पन्नकार्यद्रव्यस्यसंजिहीर्षावशात्॥क्रिया
तयापरमाणुद्वयस्यविभागेसतिद्व्यणुकनाशः॥ततस्त्र्यणुकस्यततश्चतुरणु
कस्येत्येवंपृथिव्यादिनाशः॥असमवायिकारणनाशात्॥द्व्यणुकनाशः॥सम
वायिकारणनाशात्॥त्र्यणुकनाशइतिसंप्रदायः॥सर्वत्रासमवायिकारणना

शिव ॥ ७ ॥

विद्यमानत्वे ८

शात्द्रव्यनाशइतिनवीनाः॥किंपुनःपरमाणुसद्भावेप्रमाणं॥उच्यते॥जालसूर्यमरीचि
स्थंसूक्ष्मतमंयदुपलभ्यते तत्सावयवं॥चाक्षुषद्रव्यत्वात्पटवत्।त्र्यणुकावयवाःसा
वयवाःमहदारंभकत्वात्॥तंतुवत्॥द्व्यणुकावयवःसएवपरमाणुः॥सचनित्यः
कार्यत्वेऽनवस्थाप्रसंगात्॥ननुसृष्टिप्रलयसद्भावेकिंप्रमाणमितिचेन्न॥धा
तायथापूर्वमकल्पयदित्यादिश्रुतिःप्रमाणं॥सर्वकार्यद्रव्यध्वंसअवांतरप्रलयः
सर्वकार्यध्वंसोमहाप्रलयइतिविवेकः॥आकाशंलक्षयति॥शब्दगुणमिति॥
नन्वाकाशमपिकिंपृथिव्यादिवन्नानानेत्याह॥तच्चैकमिति॥भेदेप्रमाणाभा
वादित्यर्थः॥एकत्वादेवसर्वत्रशब्दोपलब्धेर्विभुत्वमंगीकर्त्तव्यमित्याह॥विभ्वि
ति॥सर्वमूर्त्तद्रव्यसंयोगित्वंविभुत्वं॥मूर्त्तत्वंपरिच्छिन्नपरिमाणवत्त्वंक्रियाव

॥८॥ त्वंवा॥ विभुत्वादेव आत्मवत् नित्यत्वमित्याह॥ नित्यंचेति। कालंलक्षयति॥ अतीतेति॥
सर्वाधारः कालः सर्वकार्यनिमित्तकारणंच। दिशोलक्षणमाह॥ प्राचीति॥ दिगपि
कार्यमात्रे निमित्तकारणं॥ आत्मनोलक्षणमाह॥ ज्ञानेति॥ आत्मानंविभज
ते॥ सद्विविध इति॥ परमात्मनोलक्षणमाह॥ तत्रेति॥ नित्यज्ञानाधिकरण
त्वमीश्वरत्वं॥ नन्वीश्वर[redacted]सद्भावे किंप्रमाणं॥ नतावत्प्रत्यक्षं॥ तद्धिबाह्यं
आंतरंवा॥ नाद्यः। अरूपिद्रव्यत्वात्। नांत्यः। आत्मसुखादिव्यतिरिक्त
त्वात्॥ नाप्यनुमानं॥ लिंगाभावादितिचेन्न॥ अंकुरादिकं कर्तृजन्यं कार्य
त्वात् घटवदित्यनुमानस्य प्रमाणत्वात्॥ उपादानगोचरापरोक्षज्ञानचिकीर्षा ला
कृतिमत्वंकर्तृत्वं॥ उपादानंसमवायिकारणं॥ सकलपरमाण्वादिसूक्ष्म भिव

॥८॥

दर्शित्वात्सर्वज्ञत्वं॥ यःसर्वज्ञः सर्वविदित्यागमोपितत्रप्रमाणं॥ जीवस्यलक्षणमाह।
जीवेति॥ सुखादिकं जीवलक्षणं॥ ननुमनुष्योहं ब्राह्मणोहमित्यादौ सर्वत्राहंप्रत्ययेश
रीरस्यैवविषयत्वात्॥ शरीरमेवात्मेतिचेन्न॥ शरीरस्यात्मत्वे करपादादिना
शे शरीरनाशात्॥ आत्मनोपिनाशप्रसंगात्॥ नापींद्रियाणामात्मत्वं॥
योहंघटमप्राक्षं सोहमिदानींस्पृशामि॥ त्यनुसंधानाभावप्रसंगात्॥ अ
न्यानुभूतेऽन्यस्यानुसंधानायोगात्॥ तस्माद्देहेंद्रियव्यतिरिक्तोजीवः॥ सु
खदुःखादिवैचित्र्यात्प्रतिशरीरंभिन्नः॥ सचनपरमाणुः॥ शरीरव्यापिसुखा
घयादिप नुपलब्धिप्रसंगात्॥ नमध्यमपरिमाणः॥ तथासत्यनित्यत्वप्रसंगेन कृतहा
शिभाता नाकृताभ्यागमप्रसंगात्॥ तस्मान्नित्योविभुर्जीवः॥ मनसोलक्षणमाह॥ सु

त्वेति॥स्पर्शरहितत्वे सति क्रियावत्त्वं मनो लक्षणं॥मनो विभजते॥तच्चेति॥एकस्यैवा
त्मनः एकैकं मन इत्यात्मनामनेकत्वान्मनसोप्यनेकत्वमित्यर्थः॥परमाणुरूप
मिति॥मध्यमपरिमाणत्वे अनित्यत्वप्रसंगादित्यर्थः॥ननु मनो विभुः स्प
र्शरहितद्रव्यत्वादाकाशवदिति चेन्न॥मनसो विभुत्वे आत्ममनःसंयोग
स्यासमवायिकारणस्याभावात् ज्ञानानुत्पत्तिप्रसंगात्॥न च विभुद्व
यस्य संयोगोस्तीति वाच्यं॥तत्संयोगस्य नित्यत्वेन सुषुप्त्यभावप्रसंगा
त्॥पुरीततीव्यतिरिक्तदेशे आत्ममनःसंयोगस्य सर्वदा विद्यमानत्वात्॥ सा
अणुत्वे तु यदा मनः पुरीततिं प्रविशति तदा सुषुप्तिः॥यदा निःसर शिव
ति तदा ज्ञानोत्पत्तिरित्यणुत्वसिद्धिः॥रूपं लक्षयति॥चक्षुरिति

संख्यादावतिव्याप्तिवारणाय मात्रपदं॥रूपत्वेऽतिव्याप्तिवारणाय गुणपदं॥ननु अ
व्याप्यवृत्तिनीलादिसमुदाय एव चित्ररूपमिति चेन्न॥रूपस्याव्याप्यवृत्तित्वानि
यमात्॥ननु चित्रपटेऽवयवरूपैरेव प्रतीतिरस्त्विति चेन्न॥रूपरहितत्वे
न पटस्याप्रत्यक्षत्वप्रसंगात्॥न च रूपवत्समवेतत्वं प्रत्यक्षप्रयोजकं॥गौ
रवात्॥तस्मात्पटस्य प्रत्यक्षानुपपत्त्या चित्ररूपं॥तस्याश्रयमाह॥पृथ्वीति॥ सिद्धिः
आश्रयं विभज्य दर्शयति॥तत्रेति॥रसं लक्षयति॥रसनेति॥रसत्वेति
व्याप्तिवारणाय गुणपदं॥तस्याश्रयमाह॥पृथ्वीति॥आश्रयं विभज्य दर्शय
रसस्यार ति॥पृथिव्यामिति॥गंधं लक्षयति॥घ्राणेति॥गंधत्वेतिव्याप्तिवारणाय गुण

तर्कदीपिका ते॥ आपाकनिक्षिप्तघटे परमाणुषु रूपान्तरोत्पत्तौ श्यामघटनाशे पुनर्द्व्यणुकाद्

॥१०॥ पदं॥ स्पर्शं लक्षयति॥ त्वगिति॥ स्पर्शत्वेऽतिव्याप्तिवारणाय गुणपदं॥ संयो
गादावतिव्याप्तिवारणाय मात्रपदं॥ पाकजमिति॥ पाकस्तेजःसंयोगः॥ तेन
पूर्वं निरस्यति रूपांतरमुत्पद्यत इत्यर्थः॥ अत्र परमाणुष्वेव पाकः न तु द्व्यणुका
दिक्रमेण रक्तघटोत्पत्तिः॥ अत्र परमाणवः समवायिकारणं॥ तेजःसंयो
गोऽसमवायिकारणं॥ अदृष्टादिकं निमित्तकारणं॥ द्व्यणुकादिरूपे कार
णरूपं असमवायिकारणमिति पीलुपाकवादिनो वैशेषिकाः॥ पूर्वघटस्य ना
शं विनैवावयविन्यवयवेषु परमाणुपर्यन्तेषु च युगपद्रूपांतरोत्पत्तिः पिठर
पाकवादिनो नैयायिकाः॥ अत एव पार्थिवपरमाणुषु रूपादिकमनित्यमि
त्यर्थः॥ अन्यत्र जलादावित्यर्थः॥ नित्यगतमिति॥ परमाणुगतमित्यर्थः॥ अ पि शिव

॥१०॥

स्पर्तं

नित्यगतमिति॥ द्व्यणुकादिनिष्ठमित्यर्थः॥ रूपादिचतुष्टयमुद्भूतं प्रत्यक्षं॥
अनुद्भूतमप्रत्यक्षं॥ उद्भूतत्वं प्रत्यक्षप्रयोजको धर्मः॥ तदभावोऽनुद्भूतत्वं॥
संख्यां लक्षयति॥ एकेति॥ परिमाणं लक्षयति॥ मानेति॥ परिमाणं वि
जानते॥ तच्चेति॥ भावप्रधानो निर्देशः॥ अणुत्वं महत्त्वं दीर्घत्वं ह्रस्वत्वं
चेत्यर्थः॥ पृथक्त्वं लक्षयति॥ पृथगिति॥ इदमस्मात्पृथगिति व्यवहारका
रणमित्यर्थः॥ संयोगं लक्षयति॥ संयुक्तेति॥ इमौ संयुक्ताविति व्यवहारहे
तुरित्यर्थः॥ संख्यादिलक्षणेषु सर्वत्र दिक्कालादावतिव्याप्तिवारणाय
असाधारणं देयं॥ संयोगो द्विविधः॥ कर्मजः संयोगजश्च॥ आद्यो हस्त
क्रियया हस्तपुस्तकसंयोगः॥ द्वितीयो हस्तपुस्तकसंयोगात्कायपुस्त

॥११॥ पुस्तकसंयोगः॥ अव्याप्यवृत्तिः संयोगः॥ स्वात्यंताभावसमानाधिकरणत्वं
अव्याप्यवृत्तित्वं॥ विभागं लक्षयति॥ संयोगेति॥ कालादावतिव्याप्तिवार
णाय गुणपदं॥ रूपादावतिव्याप्तिवारणाय संयोगनाशक इति॥ विभागो
पि कर्मजो विभागजश्चेति॥ आद्यो हस्तपुस्तकविभागः॥ द्वितीयः कायपु
स्तकविभागः॥ परत्वापरत्वयोर्लक्षणमाह॥ परापरेति॥ परव्यवहारका
रणं परत्वं॥ अपरव्यवहारकारणं अपरत्वमित्यर्थः॥ विभजते॥ द्विवि
ध इति॥ दिक्कृतयोरुदाहरणमाह॥ दूरस्थ इति॥ कालकृतयोरुदाहरण
इति॥ ज्येष्ठेति॥ गुरुत्वं लक्षयति॥ आद्येति॥ द्वितीयादिपतने वेगस्यास
मवायिकारणत्वात्॥ वेगेतिव्याप्तिवारणायाद्येति॥ द्रवत्वं लक्षयति॥ शिव

॥११॥

स्यंदनेति॥ स्यंदनं स्रवणं॥ तेजःसंयोगजन्यं नैमित्तिकं॥ तद्भिन्नं सांसिद्धिकं च॥ पृथिव्यां नैमि
त्तिकमुदाहरति॥ घृतादाविति॥ तेजसि सुवर्णादाविति॥ स्नेहं लक्षयति॥ चूर्णेति॥ कालादा
वतिव्याप्तिवारणाय गुण इति॥ रूपादावतिव्याप्तिवारणाय पिंडीभाव इति॥ शब्दं लक्षय
ति॥ श्रोत्रेति॥ शब्दत्वेऽतिव्याप्तिवारणाय गुण इति॥ रूपादावतिव्याप्तिवारणाय श्रोत्रे
ति॥ शब्दस्त्रिविधः॥ संयोगजो विभागजः शब्दजश्चेति॥ तत्राद्यो भेरीदंडसंयोग
जन्यः॥ द्वितीयो वंशे पाट्यमाने दलद्वयविभागजन्यश्चटचटाशब्दः॥ भेर्यादिदे
शमारभ्य श्रोत्रपर्यंतं द्वितीयादिशब्दाः शब्दजाः॥ बुद्धेर्लक्षणमाह॥ बुद्धिरिति॥
जानामीत्यनुव्यवसायादिगम्यज्ञानत्वमेव बुद्धेर्लक्षणमित्यर्थः॥ बुद्धिं विभज
ते॥ सेति॥ स्मृतेर्लक्षणमाह॥ संस्कारेति॥ भावनाख्यः संस्कारः॥ संस्कारध्वंसे
तिव्याप्तिवारणाय ज्ञानमिति॥ घटादिप्रत्यक्षेऽतिव्याप्तिवारणाय संस्कारजन्य

मिति॥ प्रत्यभिज्ञानेऽतिव्याप्तिवारणाय मात्रेति॥ अनुभवं लक्षयति॥ तद्भिन्नमिति॥ स्मृ-
तिभिन्नं ज्ञानमनुभवः॥ अनुभवं विभजते॥ स द्विविध इति॥ यथार्थानुभवस्य लक्ष-
णमाह॥ तद्वतीति॥ ननु घटे घटत्वमिति प्रमायामव्याप्तिः॥ घटत्वे घटाभावादि-
ति चेन्न॥ यत्र यत्संबंधोऽस्ति तत्र तत्संबंधानुभव इत्यर्थात्॥ घटसंबंधवति घटत्वे
द घटसंबंधावगाहित्वमिति याथार्थ्यं॥ घटत्वेपि घटसंबंधोऽस्तीति नाव्याप्तिः॥ सैवे-
ति॥ यथार्थानुभवः शास्त्रे प्रमेत्युच्यते॥ अयथार्थानुभवं लक्षयति॥ तदभाववती-
ति॥ नन्विदं संयोगीति प्रमायामतिव्याप्तिरिति चेन्न॥ यदवच्छेदेन यत्सं-
बंधाभावः॥ तदवच्छेदेन तत्संबंधज्ञानस्य विवक्षितत्वात्॥ संयोगाभा-
वावच्छेदेन संयोगज्ञानस्य भ्रमत्वात्॥ संयोगावच्छेदेन संयोगसंबंधस्य शिव
सत्त्वान्नातिव्याप्तिः॥ यथार्थानुभवं विभजते॥ यथार्थेति॥ प्रसंगात्प्रमाक-

रणं विभजते॥ तत्करणमिति॥ प्रमाकरणमित्यर्थः॥ प्रमाकरणं प्रमाणमिति प्रमाण-
सामान्यलक्षणं॥ करणलक्षणमाह॥ असाधारणेति॥ साधारणकारणे दिक्का-
लादावतिव्याप्तिवारणाय असाधारणेति॥ कारणलक्षणमाह॥ कार्येति॥ पूर्व-
वृत्तिकारणमित्युक्ते रासभादावतिव्याप्तिः स्यादतो नियतेति॥ तावन्मात्रे कृते का-
र्येऽतिव्याप्तिः॥ अतः पूर्ववृत्तीति॥ ननु तंतुरूपमपि पटं प्रति कारणं स्यादिति चे-
न्न॥ अनन्यथासिद्धत्वे सतीति विशेषणात्॥ अनन्यथासिद्धत्वं अन्यथासिद्धि-
विरहः॥ अन्यथासिद्धिस्त्रिधा॥ येन सहैव यस्य यं प्रति पूर्ववृत्तित्वमवग-
म्यते॥ तं प्रति तेन तदन्यथासिद्धं॥ यथा तंतुना तंतुरूपं तंतुत्वं च पटं प्रति॥
अन्यं प्रति पूर्ववृत्तित्वे ज्ञात एव यस्य यं प्रति पूर्ववृत्तित्वमवगम्यते॥ तं प्रति

॥१३॥ तदन्यथासिद्धं॥यथाशब्दं प्रति पूर्ववृत्तित्वे ज्ञाते एव पटं प्रत्याकाशस्य॥अ
न्यत्र क्लृप्तनियतपूर्ववृत्तिन एव कार्यसंभवे तत्सहभूतं अन्यथासिद्धं॥यथापा
कजस्थले गंधं प्रति रूपप्रागभावस्य॥एवं अनन्यथासिद्धनियतपूर्ववृत्तित्वं कारणत्वं॥
कार्यलक्षणमाह॥कार्यमिति॥कारणं विभजते॥कारणमिति॥समवायिकारणलक्ष
णमाह॥यत्समवेतमिति॥यस्मिन्समवेतमित्यर्थः॥असमवायिकारणलक्ष
णमाह॥कार्येणेति॥कार्येणेत्युदाहरति॥तंतुसंयोग इति॥कार्यपदेन सह ए
कस्मिन् तंतौ समवेतत्वात् तंतुसंयोगः पटस्य असमवायिकारणमित्यर्थः॥कार
णेन सहेत्युदाहरति॥तंतुरूपमिति॥कारणेन पटेन सह एकस्मिंतंतौ समवे शिव

तत्वात् तंतुरूपं पटरूपस्य असमवायिकारणमित्यर्थः॥निमित्तकारणमाह॥तदुभयेति॥स
मवाय्यसमवायिकारणभिन्नं कारणं निमित्तकारणमित्यर्थः॥करणलक्षणमुपसंहरति॥त
देतदिति॥प्रत्यक्षलक्षणमाह॥इंद्रियेति॥इंद्रियं चक्षुरादि अर्थो घटादिः तयोः संन्निकर्षः
संयोगादिस्तज्जन्यं ज्ञानमित्यर्थः॥तद्विभजते॥तद्द्विविधमिति॥निर्विकल्पकस्य लक्षण
माह॥निःप्रकारकमिति॥विशेषणविशेष्यसंबंधानवगाहि ज्ञानमित्यर्थः॥ननु
निर्विकल्पके किं प्रमाणमिति चेन्न॥गौरिति विशिष्टज्ञानं॥विशेषणज्ञानजन्यं वि
शिष्टज्ञानत्वात्॥दंडीति ज्ञानवत्॥इति अनुमानस्य प्रमाणत्वात्॥विशेषणज्ञानस्या
पि सविकल्पकत्वे अनवस्थाप्रसंगात्॥निर्विकल्पकं सिद्धं॥सविकल्पकं लक्षयति॥
सप्रकारकमिति॥नामजात्यादिविशेषणविशेष्यसंबंधावगाहि ज्ञानमित्यर्थः॥
सविकल्पकमुदाहरति॥यथेति॥इंद्रियार्थसन्निकर्षं विभजते॥प्रत्यक्षेति॥संयो
गसंन्निकर्षमुदाहरति॥चक्षुषेति॥द्रव्यप्रत्यक्षे सर्वत्र संयोगः संन्निकर्षः॥आत्मामन

॥१४॥ सा संयुज्यते मन इंद्रियेण इंद्रियमर्थेनि ततः प्रत्यक्षज्ञानमुत्पद्यते॥ संयुक्तसमवायमुदाहरति।
घटरूपेति॥ तत्र युक्तिमाह॥ चक्षुःसंयुक्तेति॥ संयुक्तसमवेतसमवायमुदाहरति॥ रूपत्वेति।
समवायमुदाहरति॥ श्रोत्रेणेति॥ तदुपपादयति॥ कर्णेति॥ ननु दूरस्थशब्दस्य कथं श्रोत्र
संबंधइत्यत आह।ति चेन्न॥ वीचितरंगन्यायेन कदंबमुकुलन्यायेन वा शब्दांतरोत्पत्ति
रिति क्रमेण श्रोत्रदेशे जातस्य शब्दस्य श्रोत्रसंबंधात्॥ प्रत्यक्षत्वसंभवात्॥ समवेत
समवायमुदाहरति॥ शब्दत्वेति॥ विशेषणविशेष्यभावमुदाहरति॥ अभावेति॥ घटा
भाववदिति॥ भूतले घटो नास्तीत्यत्राभावस्य विशेषणत्वं द्रष्टव्यं॥ एतेनानुपलब्धेः प्र
माणत्वं निरस्तं॥ यद्यत्र घटोऽभविष्यत्तदा भूतलमिवाद्रक्ष्यत्॥ दर्शनाभावान्नास्तीति
तर्कितप्रतियोगिसत्त्वविरोध्यनुपलब्धिसहकृतेंद्रियेणैवाभावज्ञानोपपत्तौ अनु
पलब्धेः प्रमाणांतरत्वासंभवात्॥ अधिकरणज्ञानार्थमपेक्षणीयेंद्रियस्यैव करण शिव
त्वोपपत्तौ अनुपलब्धेः करणत्वस्यायुक्तत्वात्॥ ननु विशेषणविशेष्यभावसंनिकर्ष ॥१५॥

स्य संबंधलक्षणाभावात्कथं संबंधत्वमिति चेन्न॥ विशेषणविशेष्यभावो विशेषणविशेष्यस्य
स्वरूपमेव॥ नातिरिक्तः संबंधः॥ प्रत्यक्षज्ञानमुपसंहरति॥ तस्य करणमाह॥ एवमिति॥ अ
साधारणत्वादिंद्रियं प्रत्यक्षज्ञानस्य करणमित्यर्थः॥ प्रत्यक्षमुपसंहरति॥ तस्मादिति॥
अनुमानं लक्षयति॥ अनुमितिकरणमिति॥ अनुमितेर्लक्षणमाह॥ परामर्शेति॥ ननु सं
शयोत्तरप्रत्यक्षेऽतिव्याप्तिः॥ स्थाणुपुरुषसंशयानंतरं पुरुषत्वव्याप्यकरचरणादिमानय
मिति परामर्शे सति पुरुष एवेति प्रत्यक्षजननात्॥ न च तत्रानुमितिरेवेति वाच्यं॥ पुरुषं
साक्षात्करोमीत्यनुव्यवसायविरोधादिति चेन्न॥ पक्षतासहकृतपरामर्शजन्यत्वस्य
विवक्षितत्वात्॥ सिषाधयिषाविरहसहकृतसिद्ध्यभावः पक्षता॥ साध्यसिद्धिरनुमि
तिप्रतिबंधिका॥ सिद्धिसत्त्वेपि अनुमिनुयामितीच्छायामनुमितिदर्शनात्॥ सिषाधयि
षोत्तेजिका॥ ततश्चोत्तेजकाभावविशिष्टमण्यभावस्य दाहकारणत्ववत्॥ सिषाधयि

॥१५॥ घविरहसहकृतसिध्याभावस्यापि अनुमितिकारणत्वं ॥ परामर्शं निरूपयति ॥ व्याप्तीति ॥ व्याप्तिवि
षयकं यत्पक्षधर्मताज्ञानं स परामर्श इत्यर्थः ॥ परामर्शमभिनीय दर्शयति ॥ यथेति ॥ अ
नुमितिमभिनीय दर्शयति ॥ तज्जन्यमिति ॥ परामर्शजन्यमित्यर्थः ॥ व्याप्तेर्लक्षणमाह ॥
यत्रेति ॥ यत्र धूम इति व्याप्तेरभिनयः ॥ साहचर्यनियम इति लक्षणं ॥ साहचर्यं सामाना
धिकरण्यं ॥ तस्य नियमो हेतुसमानाधिकरणात्यंताभावाप्रतियोगिसाध्यसमाना
धिकरण्यं व्याप्तिरित्यर्थः ॥ पक्षधर्मतास्वरूपमाह ॥ व्याप्यस्येति ॥ अनुमानं विभजते ॥
अनुमानं द्विविधमिति ॥ तद्दर्शयति ॥ स्वार्थानुमानं दर्शयति ॥ स्वयमेवेति ॥ भूयोदर्शनेति ॥ न
नु पार्थिवत्वलोहलेख्यत्वादौ शतशः ॥ सहचारदर्शनेपि व्यभिचारोपलब्धेः ॥ भूयोदर्शने
न कथं व्याप्तिग्रह इति चेन्न ॥ व्यभिचारज्ञानविरहसहकृतसहचारज्ञानस्य व्याप्तिग्राह शिव
कत्वात् ॥ व्यभिचारज्ञानं निश्चयः शंका च तद्विरहः क्वचित् तर्कात् क्वचित् स्वतःसिद्ध एव ॥१५॥

धूमाग्निव्याप्तिग्रहे कार्यकारणभावभंगप्रसंगात् ... लक्षणस्तर्कः व्यभिचारशंकानिवर्तकः ॥ ननु
सकलवह्निधूमयोः सन्निकर्षाभावात् कथं व्याप्तिग्रह इति चेन्न ॥ धूमत्ववह्नित्वरूपसामा
सता न्यप्रत्यासत्त्या सकलधूमवह्निज्ञानसंभवात् ॥ तस्मादिति लिंगपरामर्शादित्यर्थः ॥ परार्थानुमानमा
ह ॥ यत्त्विति ॥ यत्तु स्वयं ... तत्परार्थानुमानमिति तच्छब्देनान्वयः ॥ पंचावयववाक्यमुदाहर
ति ॥ यथेति ॥ अवयवस्वरूपमाह ॥ प्रतिज्ञेति ॥ उदाहृतवाक्ये प्रतिज्ञाविशेषमाह ॥ पर्वतोव
ह्निमानिति ॥ साध्यवत्तया पक्षवचनं प्रतिज्ञा ॥ पंचम्यंतं लिंगप्रतिपादकं हेतुः ॥ व्याप्तिप्रतिपा
दकं उदाहरणं ॥ पक्षधर्मताज्ञानार्थं उपनयः ॥ अबाधितत्वादिकं निगमनप्रयोजनं ॥ अ
नुमितिकरणमाह ॥ स्वार्थेति ॥ ननु व्याप्तिस्मृतिपक्षधर्मताज्ञानाभ्यामेवानुमितिसंभ
वे विशिष्टपरामर्शः किमर्थमंगीकर्तव्य इति चेन्न ॥ वह्निव्याप्यवानयमिति परामर्शद्वारा

शाब्दपरामर्शस्थलेपि परामर्शस्यावश्यकतया लाघवेन सर्वत्र परामर्शस्यैव करणत्वात् ॥ लिंगं न करणं अतीतादौ व्यभिचारात् ।
व्यापारवत्कारणं करणमिति ॥ १

व्याप्तिज्ञानं कारणं ॥ तज्जन्यत्वे सति तज्जन्यजनको व्यापारः ॥ अनुमानमुपसंहरति ॥ तस्मादिति ॥
लिंगं विभजते ॥ लिंगमिति ॥ अन्वयव्यतिरेकि लक्षयति ॥ अन्वयेति ॥ हेतुसाध्ययोर्व्याप्तिर
न्वयव्याप्तिः ॥ तदभावयोर्व्याप्तिर्व्यतिरेकव्याप्तिः ॥ केवलान्वयिनो लक्षणमाह ॥ अन्वयेति ॥
केवलान्वयिसाध्यकं केवलान्वयि ॥ अत्यंताभावाप्रतियोगित्वं केवलान्वयित्वं ॥ ईश्वर
श्री प्रमाविषयत्वं सर्वपदाभिधेयत्वं च सर्वत्रास्तीति व्यतिरेकाभावः ॥ व्यतिरेकिणमुदा
हरति ॥ पृथिवीति ॥ ननु तद्भेदं प्रसिद्धो न वा ॥ आद्ये यत्र सिद्धस्तत्र हेतुसत्वेन्वयि प्र
त्वं ॥ असत्वेऽसाधारण्यं ॥ द्वितीये साध्यज्ञानाभावात्कथं तद्विशिष्टानुमितिः ॥ वि
शेषणज्ञानाभावे विशिष्टज्ञानानुदयात् ॥ प्रतियोगिज्ञानाभावाद्व्यतिरेकव्याप्ति
ज्ञानमपि न स्यादिति चेन्न ॥ जलादित्रयोदशान्योन्याभावानां त्रयोदशसु प्रत्ये शिव
कं प्रसिद्धानां मेलनं पृथिव्यां साध्यते ॥ त्रयोदशत्वावच्छिन्नसाध्यस्यैकाधिक

रणवृत्तित्वाभावात् ॥ नान्वयित्वासाधारण्ये इति ॥ प्रत्येकाधिकरणप्रसिद्ध्या साध्यविशिष्टानुमि
ति ॥ व्यतिरेकव्याप्तिनिरूपणं चेति ॥ पक्षलक्षणमाह ॥ संदिग्धेति ॥ ननु श्रवणानंतर
भाविमननस्थलेऽव्याप्तिः ॥ तत्र वेदवाक्यैरात्मनो निश्चितत्वेन संदेहाभावात् ॥ किं
च प्रत्यक्षेऽपि वह्नौ यत्रेच्छयानुमितिस्तत्राव्याप्तिरिति चेन्न ॥ उक्तपक्षताश्रयत्व
स्य पक्षलक्षणत्वात् ॥ सपक्षलक्षणमाह ॥ निश्चितेति ॥ विपक्षलक्षणमाह ॥
निश्चितेति ॥ एवं सद्धेतुं निरूप्य असद्धेतुं निरूपयितुं विभजते ॥ अनुमितिप्रतिबं
धकयथार्थज्ञानविषयत्वं हेत्वाभासत्वं ॥ सव्यभिचारं विभजते ॥ सत्रिविध इ
ति ॥ साधारणं लक्षयति ॥ तत्रेति ॥ उदाहरति ॥ यथेति ॥ असाधारणं लक्षयति ॥
सर्वेति ॥ यथा शब्द इति ॥ अनुपसंहारिणो लक्षणमाह ॥ अन्वयेति ॥ यथा
सर्वमिति ॥ विरुद्धं लक्षयति ॥ साध्येति ॥ सत्प्रतिपक्षं लक्षयति ॥ यस्येति ॥ अ

॥१७॥ सिद्धं विभजते॥ असिद्ध इति॥ आश्रयासिद्धमुदाहरति॥ गगनेति॥ स्वरूपा
सिद्धमुदाहरति॥ शब्द इति॥ व्याप्यत्वासिद्धस्य लक्षणमाह॥ सोपाधिक इति॥
उपाधिलक्षणमाह॥ साध्येति॥ उपाधिश्चतुर्विधः॥ केवलसाध्यव्यापकः॥
पक्षधर्मावच्छिन्नसाध्यव्यापकः॥ साधनावच्छिन्नसाध्यव्यापकः॥ उदासी
नधर्मावच्छिन्नसाध्यव्यापकश्चेति॥ आद्य आर्द्रेंधनसंयोगः॥ द्वितीयो
यथा॥ वायुः प्रत्यक्षः प्रमेयत्वादित्यत्र बहिर्द्रव्यत्वावच्छिन्नप्रत्यक्षत्व
व्यापकमुद्भूतरूपवत्वं॥ तृतीयो यथा॥ प्रागभावो विनाशी॥ जन्यत्वादित्य
त्र जन्यत्वावच्छिन्नानित्यत्वव्यापकत्वं भावत्वं॥ बाधितस्य लक्षणमाह॥ शिव
यस्येति॥ अत्र बाधस्य ग्राह्याभावनिश्चये न सत्प्रतिपक्षस्य विरोधिज्ञाने सा
मग्रीत्वेन साक्षादनुमितिप्रतिबंधकं॥ इतरेषां परामर्शप्रतिबंधकं॥

त्वं॥ तत्रापि साधारणस्य व्यभिचाराभावतया विरुद्धस्य सामानाधिक
रण्याभावतया व्याप्यत्वासिद्धस्य विशिष्टव्याप्यभावतया असाधारणानुप
संहारिणो व्याप्तिग्राहकाभावेन च व्याप्तिज्ञानप्रतिबंधकत्वं॥ आश्रया
सिद्धेः स्वरूपासिद्धेश्च पक्षधर्मताज्ञानप्रतिबंधकत्वं॥ उपाधिस्तु व्यभिचार
ज्ञानद्वारा व्याप्तिज्ञानप्रतिबंधकः॥ सिद्धसाधनं तु पक्षताविघटकतया आ
श्रयासिद्धावंतर्भवति॥ निग्रहस्थानांतरमिति नवीनाः॥ इत्यनुमानपरि
च्छेदः समाप्तः॥ उपमानं लक्षयति॥ उपमितेति॥ शब्दं लक्षयति॥ आप्तेति॥ वाक्यं ल
क्षयति॥ वाक्यमिति॥ पदलक्षणमाह॥ शक्तमिति॥ अर्थस्मृत्यनुकूलः पदपदा
र्थसंबंधः शक्तिः॥ सा च पदार्थांतरमिति मीमांसकाः॥ तन्निरासार्थमाह॥ अस्मा
दिति॥ डित्थादीनामपि यदृच्छानामपि संकेत एव शक्तिः॥ ननु पदार्थांतरमित्यर्थः॥

गवादिशब्दानांजातावेवशक्तिः॥विशेषणतयाजातेःप्रथममुपस्थितत्वात्॥व्यक्तिला
भस्त्वाक्षेपादिनादितिकेचित्तन्नगामानयेत्यादौवृद्धव्यवहारेसर्वत्रानय
नादेर्व्यक्तावेवसंभवेनजात्याकृतिविशिष्टव्यक्तावेवशक्तिकल्पनात्॥श
क्तिग्रहश्चवृद्धव्यवहारेण॥व्युत्पित्सुर्बालोगामानयेत्युत्तमवृद्धवाक्यश्रव
णानंतरंमध्यमवृद्धस्यप्रवृत्तिमुपलभ्यगवानयनंचदृष्ट्वामध्यमवृद्धप्रवृत्ति
जनकज्ञानस्यान्वयव्यतिरेकाभ्यांवाक्यजन्यत्वंनिश्चित्याश्वमानयगांबधाने
तिवाक्यांतरेआवापोद्वापाभ्यांगोपदस्यगोत्वविशिष्टेशक्तिः॥अश्वपदस्य
अश्वत्वविशिष्टेशक्तिः॥इतिव्युत्पद्यते॥ननुसर्वत्रकार्यपरत्वात्व्यवहार
स्यकार्यवाक्यएवव्युत्पत्तिर्नसिद्धपरइतिचेन्न॥काश्यांत्रिभुवनतिलकोभू
पतिरित्यादौसिद्धेपिव्यवहारात्॥विकसितपद्मेमधुनिमधुकरःपिबती

त्यादौप्रसिद्धपदसमभिव्याहारात्॥सिद्धेपिमधुकरादिव्युत्पत्तिदर्शनाच्च॥वृत्तिर्द्विविधा॥
शक्तिर्लक्षणाच॥लक्षणापिशब्दवृत्तिः॥शक्यसंबंधोलक्षणा॥गंगायांघोषइत्यत्रगं
गापदवाच्यप्रवाहसंबंधादेवतीरोपस्थितौतीरेपिशक्तिर्नकल्प्यते॥सैंधवा
दो दिलवणाश्वयोःपरस्परसंबंधाभावान्नानाशक्तिकल्पनं॥लक्षणात्रिविधा॥ज
हल्लक्षणाअजहल्लक्षणाजहदजहल्लक्षणाचेति॥यत्रवाच्यार्थस्यान्वयाभावस्त
त्रजहती॥यथामंचाःक्रोशंति॥यत्रवाच्यस्यापिअन्वयस्तत्राजहती॥यथाछ
त्रिणोगच्छंति॥यत्रवाच्यैकदेशत्यागेनएकदेशान्वयस्तत्रजहदजहतीति॥तत्त्व
मसीति॥गौण्यपिलक्षणैवलक्ष्यमाणगुणसंबंधरूपा॥अग्निर्माणवकइति॥
व्यंजनापिशक्तिलक्षणान्तर्भूता॥अर्थशक्तिमूलायानुमानादिना
न्यथासिद्धा॥तात्पर्यानुपपत्तिर्लक्षणाबीजं॥तत्प्रतीतीच्छयाउच्चरितत्वंतात्पर्यं

॥१९॥ त्पर्यज्ञानं वाक्यार्थज्ञाने हेतुः॥ नानार्थानुरोधात्प्रकरणादिकं तात्पर्यग्राहकं॥ द्वारमित्यादौ पि
धेहि इति शब्दाध्याहारः। ननु अर्थज्ञानार्थत्वाच्छब्दस्यार्थम्प्रविज्ञाय शब्दाध्याहारात्संनवा
दर्थाध्याहार एव युक्त इति चेन्न॥ पदविशेषजन्यपदार्थोपस्थितेः शाब्दज्ञाने हेतुत्वा
त्॥ अन्यथा घटः कर्मत्वमानयनं कृतिरित्यत्रापि शाब्दज्ञानप्रसंगात्॥ पंकजा
दिपदेषु योगरूढिः। अवयवशक्तिर्योगः। समुदायशक्ती रूढिः॥ नियतपद्मज्ञानार्थं
समुदायशक्तिः। अन्यथा कुमुदेपि प्रयोगप्रसंगः। इत्युन्नेचितेशक्तिःशक्तिरितिप्र रा
भाकराः॥ अन्वयस्य वाक्यार्थतया भानसंभवादन्वयांशेपि शक्तिर्न कल्पनीयेति गौ
तमीयाः। आकांक्षेति। आकांक्षां लक्षयति॥ पदस्येति॥ योग्यतालक्षणमाह॥ अर्थे
ति॥ सन्निधिलक्षणमाह॥ पदानामिति॥ अविलंबेन पदार्थोपस्थितिः सन्निधिः शिव
उच्चारणं तु तदुपयोगितया उक्तं॥ गौरश्व इति॥ घटः कर्मत्वमित्यनाकांक्षोदाहरणं॥ ॥१९॥

४ पत्ते

द्रष्टव्यं॥ वाक्यं विभजते॥ तद्वाक्यमिति॥ वैदिकस्य विशेषमाह॥ वैदिकं ईश्वरोक्तत्वादि
ति॥ ननु वेदस्यानादित्वात्कथं ईश्वरोक्तत्वमिति चेन्न॥ वेदः पौरुषेयः॥ वाक्यस
मूहत्वात्॥ भारतादिवत्॥ न च स्मर्यमाणकर्तृत्वं उपाधिः॥ गौतमादिभिः शिष्यपर
क परंपरया वेदेपि कर्तृत्वस्मरणेन साधनव्यापकत्वात्॥ तस्मात्तेपानात्त्रयो वेदा स्यालोच
अजायंत इति श्रुतेः॥ ननु वर्णा नित्याः। स एवायं गकार इति प्रत्यभिज्ञाबलात्॥ नं कुर्वाणा
चं तथा च वेदस्यानित्यत्वं कथं इति चेन्न॥ उत्पन्नो गकारो नष्टो गकार इति प्रतीत्या तदस्य सात ४
वर्णानामनित्यत्वात्॥ सोयं गकार इति प्रत्यभिज्ञायाः सेयं दीपज्वालेतिवत्॥ जा
त्यालंबनत्वात्॥ वर्णानां नित्यत्वेपि आनुपूर्वीविशिष्टवाक्यस्यानित्यत्वात्॥
तस्मादीश्वरोक्ता वेदाः॥ मन्वादिस्मृतीनां आचाराणां च वेदमूलकतया प्रामाण्यं॥

तर्कदीपिका

॥२०॥

स्मृतिमूलवाक्यानामिदानीमनध्ययनात्तन्मूलभूता काचिच्छाखोच्छिन्नेति कल्प्यते॥ ननु
पठ्यमानवेदवाक्योत्सादकस्य कल्पयितुमशक्यतया विप्रकीर्णवादस्यायुक्तत्वात्। नि
त्यानुमेयो मूलवेदो मूलमिति चेन्न॥ तथापि वर्णानुपूर्वीज्ञानाभावेन बोधकत्वासंभवा
त्॥ नन्वेतानि पदानि स्मारितार्थसंसर्गवंति॥ आकांक्षादिमत्पदकदंबकत्वा
त्॥ मद्वाक्यवत्॥ इत्यनुमानादेव संसर्गज्ञानसंभवात्॥ शब्दो न प्रमाणांतरमि
ति चेन्न॥ अनुमित्यपेक्षया शाब्दज्ञानस्य विलक्षणस्य शाब्दात्प्रत्येमीत्यनुव्य
वसायिकस्य सर्वसंमतत्वात्॥ नन्वर्थापत्तिरपि प्रमाणांतरमिति॥ पीनो देव
दत्तो दिवा न भुंक्ते इति दृष्टे श्रुते वा पीनत्वान्यथानुपपत्त्या रात्रिभोजनमर्
थापत्त्या कल्प्यत इति चेन्न॥ देवदत्तो रात्रौ भुंक्ते दिवा अभुंजानत्वे सति पीनत्वात् ॥शिव ॥२०॥

इत्यनुमानेनैव रात्रिभोजनस्य सिद्धत्वात्॥ शते पंचाशदिति संभवोप्यनुमैव
मानमेव॥ इह वृक्षे यक्षस्तिष्ठतीत्यैतिह्यमपि अज्ञातमूलवक्तृकः शब्द एव॥ चेष्टापि श
ब्दानुमानद्वारा व्यवहारहेतुरिति नन्नामांतरं॥ तस्मात्प्रत्यक्षानुमानोपमानशब्दाश्च
त्वार्येव प्रमाणानि॥ ज्ञानानां तद्वति तत्प्रकारकत्वं स्वतो ग्राह्यं परतो ग्राह्यं वेति विचा
र्यते॥ तत्र विप्रतिपत्तिः॥ ज्ञानप्रामाण्यं तदप्रामाण्याग्राहकयावज्ज्ञानग्राहकसामग्री
ग्राह्यं न वा॥ अत्र विधिकोटिः स्वतस्त्वं। निषेधकोटिः परतस्त्वं॥ अनुमानग्राह्यत्वे
न सिद्धसाधनवारणाय यावदिति॥ इदं ज्ञानमप्रमेति ज्ञानेन प्रामाण्याग्रहात्त॥
द्वारणायाप्रामाण्याग्राहकेति॥ इदं ज्ञानं प्रमेति ज्ञानवानहमित्यनुव्यवसा
यनिष्ठप्रामाण्यग्राहकस्याप्रामाण्याग्राहकत्वाभावाल्लक्षणस्त्वेन स्यात्॥ अतस्तदि

तर्कदीपिका

॥२१॥ ति॥तस्मिन्प्रामाण्याश्रये॰प्रामाण्यग्राहकइत्यर्थः॥उदाहृतस्थलेव्यवसाये॰प्रामाण्यग्रा
हकस्यापिअनुव्यवसायेनतदग्राहकत्वात्स्वतःसिद्धिः॥ननुस्वतएवप्रामाण्यंगृह्यते॥
घटमहंजानामीत्यनुव्यवसायेनघटघटत्वयोरिवतत्संबंधस्यापिविषयीकर
णात्॥व्यवसायरूपप्रत्यासत्तेस्तुल्यत्वात्॥पुरोवर्त्तिनिःप्रकारकसंबंधस्यैवप्रमा
ण्यपदार्थत्वादितिचेन्न॥स्वतःप्रामाण्यग्रहेजलज्ञानंप्रमानवेत्यनभ्यासदशायां
प्रमात्वसंशयोनस्यात्॥अनुव्यवसायेनप्रामाण्यस्यनिश्चितत्वात्॥तस्मात्स्व
तोग्राह्यत्वाभावात्परतोग्राह्यत्वं॥तथाहि॥प्रथमंजलज्ञानानंतरंप्रवृत्तौसत्यांत
ज्जलाभेसतिपूर्वोत्पन्नंजलज्ञानंप्रमा॥समर्थप्रवृत्तिजनकत्वात्॥यन्नैवंतन्नैवं॥
यथाप्रमेति॥व्यतिरेकिणाप्रमात्वंनिश्चीयते॥द्वितीयादिज्ञानेषुपूर्वज्ञानदृष्टांते शिव

॥२१॥

नतत्सजातीयत्वलिंगेनान्वयव्यतिरेकेणापिगृह्यते॥प्रमायागुणजन्यत्वादुपपत्तौपर
तस्त्वं॥प्रमाऽसाधारणंकारणंगुणः॥अप्रमाऽसाधारणंकारणंदोषः॥तत्रप्रत्यक्षे
विशेषणवद्विशेष्यसन्निकर्षोगुणः॥अनुमितौव्यापकवतिव्याप्यज्ञानं॥उपमि
तौयथार्थज्ञानंसादृश्यं॥शाब्दज्ञानेयथार्थयोग्यताज्ञानमित्याद्यूह्यं॥पुरोवर्त्तिनिप्र
काराभावस्यव्यवसायेनानुपस्थितत्वात्॥अप्रमात्वंपरतएवगृह्यते॥पित्तादिदोष
जन्यत्वादुत्पत्तौपरतस्त्वं॥ननुसर्वज्ञानानांयथार्थत्वादयथार्थज्ञानमेवनास्ति॥
नचशुक्ताविदंरजतमितिज्ञानात्॥प्रवृत्तिदर्शनादन्यथाख्यातिसिद्धिरितिवा
च्यं॥रजतस्मृतिपुरोवर्त्तिज्ञानाभ्यामेवप्रवृत्तिसंभवात्॥उपस्थितेष्टभेदाग्रह
स्यैवसर्वत्रप्रवर्त्तकत्वेननेदंरजतमित्यादावतिप्रसंगाभावादितिचेन्न॥सत्य

॥२२॥ रजतस्थले पुरोवर्त्तिविशेष्यकरजतत्वंप्रकारकज्ञानस्य प्रमात्वेन प्रवृत्तिजनकत्वाच्छुक्ताव
पि रजतार्थिप्रवृत्तिजनकत्वेन शिविवेकज्ञानस्यैव कल्पनात् ॥ अयथार्थानुभवं विभजते
स्वप्नस्यमानसविपर्ययरूपत्वात् ॥ नत्रैविध्यविरोधः ॥ संशयलक्षणमाह ॥ एकेति ॥ घटप
टाविति समूहालंबने तिव्याप्तिवारणाय एकेति ॥ घटो द्रव्यमित्यादौ अतिव्याप्तिवारणाय
विरुद्धेति ॥ परत्वविरुद्धपरत्वयोर्नित्यत्रातिव्याप्तिवारणाय नानेति ॥ विपर्ययलक्षणमाह ॥
मिथ्येति ॥ तदभाववति तत्प्रकारकनिश्चय इत्यर्थः ॥ तर्कं लक्षयति ॥ व्याप्येति ॥ यद्यपि त
र्को विपर्ययेंतर्भवति ॥ तथापि प्रमाणानु[illegible]ग्राहकत्वात् भेदेन कीर्तनं ॥ स्मृतिं लक्षय
ति ॥ स्मृतिरिति ॥ सुखं लक्षयति ॥ सर्वेषामिति ॥ सुख्यहमित्यनुव्यवसायगम्यसुखत्वा
दिकमेव लक्षणं ॥ यथाश्रुतं स्वरूपकथनमिति द्रष्टव्यं ॥ संस्कारं विभजते ॥ संस्कार इ
ति ॥ संस्कारत्वजातिमान् संस्कारः ॥ वेगस्याश्रयमाह ॥ पृथिव्यादीनि ॥ वेगत्वजातिमा
न्वेगः ॥ पृथिव्यादिचतुष्टयमनोवृत्तिरिति ॥ भावनां लक्षयति ॥ अनुभवेति ॥ आत्मामा शिव
गतिव्याप्तिवारणायचानुभवेति ॥ अनुभवध्वंसेऽतिव्याप्तिवारणाय स्मृतीति ॥ स्म ॥२२॥

तेरपि संस्कारजनकत्वं नवीनैरुक्तं । स्थितिस्थापकं लक्षयति । अन्यथेति । संख्यादयो
नैमित्तिकद्रवत्ववेगस्थितिस्थापकाः सामान्यगुणाः । अन्ये रूपादयो विशेषगुणाः ।
द्रव्यविभाजकोपाधिद्वयसमानाधिकरणावृत्तिजातिमत्त्वं विशेषगुणत्वं । कर्म
णो लक्षणमाह । चलनेति । उत्क्षेपणादीनां कार्यभेदमाह । ऊर्ध्वेति । शरीरेति । व
क्रतासंपादकमाकुंचनं । ऋजुतासंपादकं प्रसारणमित्यर्थः । आश्रयमाह । पृथि
व्यादीति । सामान्यं लक्षयति । नित्यमिति । संयोगादावतिव्याप्तिवारणाय नित्येति ॥
परमाणुपरिमाणादावतिव्याप्तिवारणायानेकेति । अनुगतत्वं समवेतत्वं । तेनाना
त्यादौ नातिव्याप्तिः । विशेषं लक्षयति । नित्येति । समवायं लक्षयति । नित्य इति । संयोगे
ऽतिव्याप्तिवारणाय नित्य इति । आकाशादावतिव्याप्तिवारणाय संबंध इति । अयुतसि
द्धलक्षणमाह । ययोरिति । नीलो घट इति विशिष्टप्रतीतिः । विशेषणविशेष्यसंबं

यविषयः। विशिष्टप्रत्ययत्वात्। दण्डीतिप्रत्ययवत् इति समवायसिद्धिः। अवयवावयविनाविति। द्रव्यसमवायिकारणमवयवः। द्रव्यजन्यमवयवि। प्रागभावं लक्षयति अनादिरिति। आकाशादावतिव्याप्तिवारणाय सान्त इति। घटादावतिव्याप्तिवारणायानादिरिति। प्रतियोगिसमवायिकारणवृत्तिः प्रतियोगिजनकः। भविष्यतीतिव्यवहारहेतुः प्रागभावः। ध्वंसं लक्षयति सादिरिति। घटादावतिव्याप्तिवारणायानन्त इति। आकाशादावतिव्याप्तिवारणाय सादिरिति। प्रतियोगिजन्यः। प्रतियोगिसमवायिकारणवृत्तिः। ध्वस्तव्यवहारहेतुः ध्वंसः। अत्यन्ताभावं लक्षयति त्रैकालिक इति। अन्योन्याभावेऽतिव्याप्तिवारणाय संसर्गावच्छिन्नेति। ध्वंसप्रागभावयोरतिव्याप्तिवारणाय त्रैकालिक इति। अन्योन्याभावं लक्षयति। तादात्म्येति। प्रतियोगितावच्छेदकमारोप्य संसर्गभेदेन प्रतियोगिकयोरत्यन्ताभावान्योन्याभावयो

र्हि त्वं केवलं देवदत्ताभावादन्याभाव इति प्रतीत्या विशिष्टाभावः। तत्तत् घटाभावात् घटत्वावच्छिन्नप्रतियोगिताको नास्तीति व्यधिकरणधर्मावच्छिन्नाभावो नाङ्गीक्रियते। पटे घटत्वं नास्तीति तस्यार्थः। अतिरिक्तत्वे सकेवलान्वयी सामयिकाभावोऽत्यन्ताभाव एव समयविशेषप्रतीयमानः। घटाभाववति घटानयनेऽत्यन्ताभावस्यान्यत्रगमनाभावेऽपि अप्रतीतेः। घटापसारणे सति प्रतीतेः। न तत्र घटसंयोगप्रागभावध्वंसयोरत्यन्ताभावप्रतीतिनियामकत्वं कल्प्यते। घटवति तत्संयोगप्रागभावप्रध्वंसयोरसत्वात् अत्यन्ताभावस्याप्रतीतिः। घटापसारणे च संयोगध्वंससत्वात्प्रतीतिरिति। केवलाधिकरणादेव नास्तीति व्यवहारोपपत्तौ अभावो न पदार्थान्तरमिति गुरवस्तन्न। अभावानङ्गीकारे केवलस्य निर्वक्तुमशक्यत्वात्। अभावाभावो भाव एव नातिरिक्तः। अनवस्थाप्रसंगात्। ध्वंसप्रागभावः प्रागभावध्वंसश्च प्रतियोग्येव। अभावाभावो

वोतिरिक्त एव। तृतीयाभावस्य प्रथमाभावस्वरूपत्वात्। नानवस्थेति नवीनाः। ननु प्रमा
णप्रमेयसंशयप्रयोजनदृष्टांतसिद्धांतावयवतर्कनिर्णयवादजल्पवितंडाहेत्वाभासछ
लजातिनिग्रहस्थानानां तत्वज्ञानान्निःश्रेयसाधिगम इति गौतमीयन्यायशास्त्रे षोडशपदा
र्थानामुक्तत्वात् कथं सप्तैवेत्यत आह। सर्वेषामिति। सर्वेषां सप्तस्वेवांतर्भाव इत्यर्थः
आत्मशरीरेंद्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयमि
ति द्वादशविधं प्रमेयं। प्रवृत्तिर्धर्माधर्मौ। रागद्वेषमोहाः दोषाः रागो इच्छा। द्वेषो म
न्युः। मोहः शरीरादावात्मभ्रमः। प्रेत्यभावो मरणं। फलं भोगः। अपवर्गो मोक्षः।
स च दुःखसमानाधिकरणदुःखप्रागभावासमानकालीनदुःखध्वंसः। प्रयोजनं
सुखं दुःखहानिश्च। दृष्टांतो महानसादिः। प्रामाणिकत्वेनाभ्युपगतोर्थः सिद्धांतः।
निर्णयो निश्चयः प्रमाणफलं। तत्वबुभुत्सोः कथा वादः। उभयसाधनवती विजिगी

षुकथा जल्पः। स्वपक्षस्थापनहीना कथा वितंडा। कथा नाम। नानावक्तृकः पूर्वोत्तरपक्षप्रतिपा
दकवाक्यसंदर्भः। अभिप्रायांतरेण प्रयुक्तस्य वाक्यस्यार्थांतरं प्रकल्प्य दूषणं छलं। असद्
उत्तरं जातिः। सा साधर्म्यवैधर्म्योत्कर्षापकर्षवर्ण्यावर्ण्यविकल्पसाध्यप्राप्त्यप्राप्तिप्रसंगप्रति
दृष्टांतउत्पत्तिअनुत्पत्तिसंशयप्रकरणहेत्वर्थापत्त्यविशेषोपपत्त्युपलब्ध्यनुपल
ब्धिनित्यानित्यकार्यसमा जातयः। वादिनो पराजयहेतुर्निग्रहस्थानं। प्रतिज्ञाहानिः।
प्रतिज्ञांतरं। प्रतिज्ञाविरोधः। प्रतिज्ञासंन्यासः। हेत्वंतरं। अर्थांतरं। निरर्थकं। अविज्ञा
तार्थं। अपार्थकं। अप्राप्तकालं। न्यूनं। अधिकं। पुनरुक्तं। अननुभाषणं। अज्ञानं।
अप्रतिभा विक्षेपः। मतानुज्ञा। पर्यनुयोज्योपेक्षणं। निरनुयोज्यानुयोगः। अपसि
द्धांतः हेत्वाभासश्च। निग्रहस्थानानि। शेषं सुगमं। ननु करतलामलकसंयोगे सत्य
पि प्रतिबंधके सति दाहानुत्पत्तेः शक्तिः पदार्थांतरमिति चेन्न। प्रतिबंधकाभावस्य

॥२५॥ कार्यमात्रे कारणत्वेन शक्तिरनुपयोगात् । कारणताया एव शक्तिपदार्थत्वात् । ननु भस्मादीनां
कांस्यादिशुद्धिदर्शनात् । आधेयशक्तिरंगीकार्येति चेन्न । भस्मादिसंयोगसमानकालीना
स्य श्यामस्पर्शप्रतियोगिकयावदभावसहितभस्मादिसंयोगस्यैव शुद्धिपदार्थत्वा
त् । स्वत्वमपि न पदार्थांतरं । यथेष्टविनियोगयोग्यत्वस्य स्वत्वपदार्थत्वात् । तद्
च क्रयप्रतिग्रहादिलब्धत्वमेवेति ॥ ॥ अथ विधिर्निरूप्यते । प्रयत्नजनकचि
कीर्षाजनकज्ञानविषयो विधिः । तत्प्रतिपादको लिंङादिर्विधिः । कृत्यसाध्ये प्रवृ
त्त्यदर्शनात् । कृतिसाध्यज्ञानं प्रवर्तकं । न च विषभक्षणादौ प्रवृत्तिप्रसंगः । इष्टसा
धनतालिंगककृतिसाध्यज्ञानस्य काम्यस्थले नित्यनैमित्तिकस्थले विहितकाल
जीवित्वनिमित्तज्ञानजन्यस्य च प्रवर्तकत्वात् । न चाननुगमः स्वविशेषणव
त्ताप्रतिसंधानजन्यत्वस्यानुगतत्वादिति गुरुमतं । लाघवेन कृतिसाध्येष्ट

साधनताज्ञानस्यैव चिकीर्षाद्वारा प्रयत्नजनकत्वात् । न च नित्ये इष्टसाधनता
भावादप्रवृत्तिप्रसंगः । तत्रापि प्रत्यवायपरिहारस्य पापक्षयस्य च फलत्वकल्प
नात्तस्मात्कृतिसाध्येष्टसाधनत्वमेव लिंङर्थः । ननु ज्योतिष्टोमेन स्वर्गका
मो यजेतेत्यत्र लिंङा स्वर्गसाधनं कार्यं प्रतीयते । यागस्याशुतरविनाशिनः
कालांतरभाविस्वर्गसाधनतायोग्यत्वात् । स्थायि कार्यमपूर्वमेव लिंङर्थः ।
कार्यं कृतिसाध्यं । कृतेः सविषयत्वाद्विषयाकांक्षायां यागो विषयत्वेनान्वेति ।
कस्य कार्यमिति नियोज्याकांक्षायां स्वर्गकामपदं नियोज्यपरतयान्वेति । का
र्यबोध्यो नियोज्यतेऽनेनेति ज्योतिष्टोमनामकयागविषयकं स्वर्गकामस्य कार्यमि
ति वाक्यार्थः संपद्यते । वैदिकलिंगत्वात् यावज्जीवमग्निहोत्रं जुहुयादिति
नित्यवाक्येप्यपूर्वमेव वाच्यं कल्प्यते । आरोग्यकामो भेषजपानं कुर्यादि

स्यादतो लौकिकलिङः क्रियाकार्यत्वे लक्षणेति चेन्न। यागस्याप्ययोग्यतानिर्णया
भावेन साधनतया प्रतीत्यनंतरं तन्निर्वाहार्थमवांतरव्यापारतयाऽपूर्वक
ल्पनात्। कीर्तनादिना नाशश्रुतेः न यागध्वंसो व्यापारः। लौकिकव्युत्पत्तिबला
त् क्रियायामेव कृतिसाध्येष्टसाधनत्वं लिङा बोध्यत इति। लिङ्त्वेन रूपेण वि
ध्यर्थत्वं। आख्यातत्वेन प्रयत्नार्थकत्वं। पचति पाकं करोतीति विवरणदर्शनात्
किं करोतीति प्रश्ने पचतीत्युत्तराच्चाख्यातस्य प्रयत्नार्थकत्वनिश्चयात्। प्र
योगश्छतीत्यादौ अनुकूलव्यापारे लक्षणा। पचति देवदत्तेन पच्यते तंडुल
इत्यादौ कर्मणि नाख्यातार्थत्वं। किंतु तंडुलैकत्वादीनामेव। तयोरपीद
वलाभः। प्रजयतीत्यादौ धात्वर्थोत्कर्षलक्षणा। उपसर्गाणां द्योतकत्वमे
वन तत्र शक्तिरस्ति। पदार्थज्ञानस्य परमप्रयोजनं मोक्षः। तथा हि। आत्मा

वाऽरे द्रष्टव्यः श्रोतव्यो मंतव्यो निदिध्यासितव्य इति श्रुत्या श्रवणादीनां साक्षा
त्कारहेतुत्वबोधनात्। श्रुत्या देहादिविलक्षणात्मज्ञाने सत्यपि असंभवना
निवृत्तये युक्त्यनुसंधानरूपमननसाध्यत्वात् मननोपयोगिपदार्थनिरूपण
द्वारा शास्त्रस्यापि मोक्षोपयोगः। तदनंतरं श्रुत्वा प्रदिष्टयोगविधिना निदिध्या
सने कृते तदनंतरं देहादिविलक्षणात्मसाक्षात्कारे सति देहादावहमभि
मानरूपमिथ्याज्ञाननाशे सति दोषाभावात् प्रवृत्त्यभावे धर्माधर्मयोरभ
वात्। जन्माभावे पूर्वधर्माधर्मयोरनुभवनाशे चरमदुःखध्वंसलक्षणो
मोक्षो जायते। ज्ञानमेव मोक्षसाधनं मिथ्याज्ञाननिवृत्तेः ज्ञानमात्रसाध्य
त्वात्। तमेव विदित्वाति मृत्युमेति नान्यः पंथा विद्यतेऽयनायेति साधनांत

रनिषेधाच्चाननुतत्प्राप्तिहेतु।विज्ञानंकर्मचोक्तं महामुने इतिकर्मणोपि मोक्ष
साधनत्वस्मरणात।ज्ञानकर्मणोः समुच्चय इति चेन्न।।नित्यनैमित्तिकै रेवकु
र्वाणोदुरितक्षयं।ज्ञानंचविमलीकुर्वन्नभ्यासेनचपावयेत।।अभ्यासात्पक्व
विज्ञानः कैवल्यंलभतेनरः इत्यादौकर्मणोज्ञानसाधनत्वप्रतिपादनात्
ज्ञानद्वारैवकर्ममोक्षसाधनंनसाक्षात।तस्मात्पदार्थज्ञानान्मोक्षः।प
रमप्रयोजनमितिसर्वैरमणीयम्।।छ।।इतिश्रीमदन्नंभट्टोपाध्याय
कृततर्कसंग्रहदीपिकासमाप्तिमगमत्।। ।।श्रीः।। ।।श्रीः।। ।।छ
लिखितेयंदीक्षितवामनभट्टात्मजशिवभट्टेनस्वात्मपठनार्थम्।।
श्रीहरंबोजयति।।श्रीः।।छ।।श्रीः।।छ।।श्रीः।।छ।।श्रीः।।छ।।श्रीः।।छ।।